শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী ৱিষ্ণুধর্মে বলি কৃতা

॥ শ্রী সুদর্শনস্তুতিঃ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী সুদর্শনস্তুতিঃ ॥

বলিরুৱাচ
অনন্তস্যাপ্রমেযস্য ৱিশ্ৱমূর্তের্মহাত্মনঃ।
নমামি চক্রিণশ্চক্রং করসঙ্গি সুদর্শনম্॥ **1**॥

সহস্রমিৱ সূর্যাণাং সঙ্ঘাতং ৱিদ্যুতামিৱ।
কালাগ্নিমিৱ যচ্চক্রং তদ্ৱিষ্ণোঃ প্রণমাম্যহম্॥ **2**॥

দুষ্টরাহুগলচ্ছেদশোণিতারুণতারকম্।
তন্নমামি হরেশ্চক্রং শতনেমি সুদর্শনম্॥ **3**॥

যস্যারকেষু শক্রাদ্যা লোকপালা ৱ্যৱস্থিতাঃ।
তদন্তর্ৱসৱো রুদ্রাস্তথৈৱ মরুতাং গণাঃ॥ **4**॥

ধারাযাং দ্ৱাদশাদিত্যাঃ সমস্তাশ্চ হুতাশনাঃ।
ধারাজালেঽৱ্যযঃ সর্ৱে নাভিমধ্যে প্রজাপতিঃ॥ **5**॥

সমস্তনেমিষ্ৱখিলা যস্য ৱিদ্যাঃ প্রতিষ্ঠিতাঃ।
যস্য রূপমনির্দেশ্যমপি যোগিভিরুত্তমৈঃ॥ **6**॥

যদ্ভ্রমৎসুরসঙ্ঘানাং তেজসঃ পরিবৃংহণম্।
দৈত্যৌজসাং চ নাশায তন্নমামি সুদর্শনম্॥ **7**॥

ভ্রমন্মতমহারৱেগৱিভ্রান্তাখিলখেচরম্।
তন্নমামি হরেশ্চক্রমনন্তারং সুদর্শনম্॥ **8**॥

নক্ষত্ররদ্বহ্নিকণব্যাপ্তং কৃৎস্নং নভস্তলম্।
তন্নমামি হরেশ্চক্রং করসঙ্গি সুদর্শনম্॥ **9**॥

স্বভারতেজসা যুক্তং যদর্কাগ্নিময়ং মহৎ।
বিশেষতো হরের্গৎরা সর্বদেরময়ং করম্॥ **10**॥

দুর্বৃত্তদৈত্যমথনং জগতঃ পরিপালকম্।
তন্নমামি হরেশ্চক্রং দৈত্যচক্রহরং পরম্॥ **11**॥

করোতু মে সদা শর্ম ধর্মতাং চ প্রযাতু মে।
প্রসাদসুমুখে কৃষ্ণে তস্য চক্রং সুদর্শনম্॥ **12**॥

স্বভারতেজসা যুক্তং মধ্যাহ্নার্কসমপ্রভম্।
প্রসীদ সংযুগেঽরিণাং সুদর্শনসুদর্শনম্।
বিদ্যুজ্জ্বালামহাকক্ষং দহান্তর্মম যত্তমঃ॥ **13**॥

জহি নো বিষযগ্রাহি মনো গ্রহবিচেষ্টিতম্।
বিস্ফোটযাখিলাং মাযাং কুরুষ্ব বিমলাং মতিম্॥ **14**॥

॥ ইতি শ্রী সুদর্শনস্তুতিঃ সমাপ্তা॥